ॐ

श्रीगुरुभ्यो नमः

रात्रि-स्मरणम्

पश्यामि चित्रमिव सर्वमिदं द्वितीयं तिष्ठामि निष्कलचिदेकवपुष्यनन्ते ।
आत्मानमद्वयं अनन्तसुखैकरूपं पश्यामि दग्धरशनामिव च प्रपथम् ॥

जगत्प्रतिष्ठा सर्वत्र पृथिव्यप्सु प्रलीयते ।
ज्योतिष्यापः प्रलीयन्ते ज्योतिर्वायौ प्रलीयते ॥

वायुश्च लीयते व्योम्नि तच्चाव्यक्ते प्रलीयते।
अव्यक्तं पुरुषे चैव निष्कले संप्रलीयते।।

पुरुषान्न परं किंचित् सा काष्ठा सा परा गतिः।
पुरातनोऽहं पुरुषोहऽमीशः ब्रह्मैवाहं सर्ववेदान्तवेद्यम् ।।

मोहेन विस्मृते दृश्ये सुषुप्तिरनुभूयते ।
बोधेन विस्मृते दृश्ये तुरीयमनुभूयते।।

न सन्ति यस्यां निद्रायां जाग्रत्स्वप्नसुषुप्तयः ।
अवस्थात्रयरूपिण्यः सर्वद्वन्द्वविसर्जनात् ॥

सुलभा शुद्धबोधानां दुर्लभा विषयात्मनाम्।
सहजा माधवादीनां सा निद्रा सुखदायिनी ||

காலமொடு தேசவர்த்த மானமாதி
கலந்துநின்ற நிலைவாழி கருணைவாழி,
மாலறவும் சைவம்முதல் மதங்களாகி
மதாதீதம் ஆன அருள் மரபு வாழி,
ஜாலம்மிகும் எளியேன்இவ் வழக்குப்பேசத்
தயவுவைத்து வளர்த்தவருள் தன்மைவாழி,
ஆலடியின் பரமகுரு வாழி வாழி.
அகண்டிதா காரஅருள் அடியார் வாழி!

மூர்த்தி எல்லாம் வாழி! எங்கள் மோனகுரு வாழி!
அருள் வார்த்தை என்றும் வாழி! அன்பர்வாழி பராபரமே!!